कण्ठस्तु "वृहच्छिराश्चतुरश्वस्त्रिनाभिः" इति पठित्वा "चतुरश्वः कालादृष्टेश्वरेच्छास्वसंकल्पाश्चत्वारोऽश्वा अस्येति"व्याचख्यौ। "अतीव हि त्रिशिरसं समुच्छिन्द्यात् कृतत्वरः" कामन्दकी। त्रिशीर्षकादयोऽप्यत्र। तत्र त्रिशूले न० हेमच०।

**त्रिशुच्** पु० तिस्रः शुचो दीप्तयः शोका वाऽस्य। स्वर्गान्तरिक्षपृथिवीस्थदीप्तित्रययुते घर्मे। "घर्मस्त्रिशुक् विराजति विराजा"यजु०३८।२७। "ताः शुचश्च तत्रैव १८ मन्त्रे उक्ता यथा"या ते घर्म! दिवा शुग्या गायत्र्यां हविर्धाने। सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा। या ते घर्मान्तरिक्षे तस्याः त्रिष्टुभ्याग्नीध्रे सा त आप्यायतामित्यादि या ते घर्म पृथिव्यां तस्या जगत्यां सदस्या। सा त आप्यायताम्"इत्यादि। २आध्यात्मिकादिशोकत्रययुक्ते च।

**त्रिशूल** न० त्रीणि शूलानीव अग्राणि यस्य। स्वनामख्याते अस्त्रभेदे हेमच०। "त्रिशूलं दक्षिणे हस्ते खड्गं चक्रं क्रमादधः" दुर्गाध्यानम् "त्रिशूलडमरुकरं व्याघ्रकृत्तिं वसानम्" शिवध्यानम्।

**त्रिशूलखात** न० त्रिशूलेन खातम्। तीर्थभेदे "त्रिशूलखातं तत्रैव तीर्थमासाद्य भारत!। तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः। गाणपत्यञ्च लभते देहं त्यक्त्वा न संशयः" भा० भ० ८४ अ०।

**त्रिशूलमुद्रा** स्त्री त्रिशूलमाकारत्वेनास्त्यस्याः कर्म०। मुद्राभेदे "अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा शिष्टाङ्गुलीत्रयम्। प्रसारयेत्त्रिशूलाख्या मुद्रैषा परिकीर्तिता" तन्त्र० तल्लक्षणमुक्तम्

**त्रिशूलिन्** पु० त्रिशूलमस्त्यस्य इनि। शिवे "त्र्यक्षोऽभेद्यस्त्रिशूली च वृषकेतुर्महाबलः" स्कन्दपु० शिवस्तवः। २दुर्गायां स्त्री ङीप्। "त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्" हरिवं० १६६ अ०।

**त्रिशृङ्ग** पु० त्रीणि शृङ्गाण्यस्य। त्रिकूटपर्वते शब्दरत्ना०। "त्रिशृङ्गः पर्वतश्चैव कुमारी च सरिद्वरा"हरिवं०२३७ अ०। २त्रिकोणे। "कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्तः"सारसमुच्चयः। [मतस्ये शब्दार्थकल्पतरुः।

**त्रिशृङ्गिन्** पु० त्रीणि शृङ्गाणि सन्त्यस्य इनि। रोहित-

**त्रिशोक** पु० त्रयः आध्यात्मिकाद्ययः शोका अस्य। १जीवे २कण्वपुत्रे ऋषिभेदे च। "अनु त्रिशोकः शतमावहन्नृन्"ऋ०१०।२९।२। त्रिशोको नामर्षिः" भा०। "याभिस्त्रिशोक उस्रिया" ऋ० १।११२।१२ "कण्वपुत्रस्त्रिशोक ऋषिः" भा०।

**त्रिषंयुक्त** त्रि० त्रिभिर्हविर्भिः संयुक्तं वेति छन्दसीति चानुवृत्तौ "पूर्वपदात्"पा० वा वेदे षत्वम्। त्रिभिर्हविर्भिः संयुक्ते इष्टिभेदे। "ऐन्द्रावैष्णवं चरुं, वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन त्रिषंयुक्तेन यजते" शत० ब्रा० ५।२।५।१। "त्रिषंयुक्तेषु" कात्या० श्रौ०१५। २।११। "त्रिभिर्हविर्भिः संयुक्तं कर्म त्रिषंयुक्तम्" संग्र० व्याख्या। २त्रिभिः संयुतमात्रे त्रि०। "दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंयुक्ताभिः" शत० ब्रा० १२।८। २३।१२१। लोके तु न षत्वम्।

**त्रिषंवत्सर** न० त्रयः संवत्सराः साधनकाला अस्य वेदे वा षत्वम्। त्रिवर्षसाध्ये सत्त्रभेदे। "त्रिषंवत्सरं षष्टिदीक्षम्" कात्या० श्रौ० २५।५।३।१२ "त्रिषंवत्सरं सत्रं तत्र षष्टिदीक्षं भवति" सं० व्या०त्रिगुणितः संवत्सरः। २त्रिवर्षे च। "महातापश्चितं त्रिषंवत्सरोपसत्कम्"कात्या० श्रौ० २५।५।६। "त्रयः संवत्सरा उपसदो यत्र" कर्कः। लोके तु न षत्वम्। ३त्रिवर्षसाध्ये वस्तुनि त्रि०।

**त्रिषन्धि** त्रि०त्रयः सन्धयोऽस्य वेदे वा षत्वम्। १त्रिसन्धियुक्ते "चातुर्मास्यानि त्रिषन्धीनि द्विसमस्तानि तस्मादिमानि पुरुषस्याङ्गानि त्रिषन्धीनि द्विसमस्तानि"शत०ब्रा० ११।५। २।७। "त्रयः सन्धयोऽन्तरालकालाश्चत्वारश्चत्वारो मासा येषां तानि त्रिसन्धीनि द्विसमस्तानि सुनासीरीयवैश्वदेवयोः फाल्गुनस्य, शुक्लचतुर्दश्यां पौर्णमास्यां वा पौर्वापर्येणाव्यवहितानुष्ठानात् द्वाभ्यां पर्वभ्यां समस्तानि संश्लिष्टानि पादतलादधस्तनोपरितनसन्ध्योरुभयोः प्रत्यासन्नत्वाद्द्विसमस्तत्वम्"भा०। [पाठान्तरम्।

**त्रि(त्र)षम** त्रि० ह्रस्वे निघण्टुः मायुषेत्यत्र तथा,त्रषमेति च

**त्रिषवण** न०सूयते सोमोऽत्र सु—आधारे ल्युट् "पूर्वपदात्"पा० वा षत्वम्। त्रिकाले प्रातर्मध्याह्नसायाह्नरूपे काले "उपस्पृशंस्त्रिषवणं पितॄन् देवांश्च तर्पयेत्। दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात्" "कुर्यात् त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा"याज्ञ०। षत्वाभावे लोके च त्रिसवनमप्यत्र

**त्रिषष्टि** स्त्री बहुत्वेऽपि एकव०त्र्यधिका षष्टिः शा०त०। १त्र्यधिकषष्टिसंख्यायां २तत्संख्येये च। "चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतो मताः"शिक्षा। पक्षे त्रय आदेशे त्रयःषष्टिरप्यत्र। त्रयश्च षष्टिश्च इति विग्रहेऽपि तदर्थे। "संख्याः" पा० त० पक्षे पूर्वपदप्रकृतिस्वर इति भेदः। इयांस्तु भेदः त्रय आदेशे अन्तोदात्तः। त्रिषष्ट्या युतं शतादि ड। त्रिषष्ट त्रिषष्टियुतशतादौ त्रि०। ततः पूरणे तमप्।